एवास्य वार्त्तिकं विधाय तीव्रसमालोचनाञ्चकार । परं पतञ्जलिः सूत्रपाठस्य वार्त्तिकस्य च महाभाष्यं विधाय सर्व्वतः प्रमादपरिशून्योऽयं पाणिनीयाष्टाध्यायीग्रन्थ इति प्रदर्शयन् कात्यायनतीव्रदृष्टेः ररक्षेयं समादरणीयं ग्रन्थसत्तमम् । अष्टाध्यायीप्रारम्भे तु चतुर्द्दशसूत्राणि सन्ति तानि तु प्रत्याहारसूत्राणि ।

अष्टाध्यायीसूत्रपाठे, आपिशलिः ।६।१।९२। गालवः । ६ । ३ । ६१ । चाक्रवर्म्मणः । ६ । १। १३० । स्फोटायनः । ६ । ? । १२३ । काश्यपः । ८ । ४ । ६७ । गार्ग्यः । ८ । ४ । ६७ । भारद्वाजः । ७ । २ । ६३ । सेनकः ५ । ४ । ११२ । शाकटायनः ।३।४।१११ । शाकल्यः । १।१।१६ । एतेषां पूर्व्वतनवैयाकरणानां नामानि सन्ति । अत्र ३९९६ संख्यकानि सूत्राणि विद्यन्ते । काश्मीरराजस्य जयापीड़स्य राजत्वसमये पाणिनिव्याकरणं वार्त्तिकेन महाभाष्येण च सह विशेषविद्यार्थिसुधीवरविद्वज्जनशिष्यार्थं प्रचलितमासीत् । यथा, राजतरङ्गिण्याम् । ४ । ६३८—६४० ।

"नितान्तं कृतकृत्यस्य गुणवृद्धिविधायिनः ।
श्रीजयापीड़देवस्य पाणिनेश्च किमन्तरम् ॥
भाष्यव्याख्याचणे शौकैर्व्विलचणवृहतैः कृतः ।
सोऽयं तस्य विपर्य्यासो बुधैरिव विवर्त्तितः ॥
कृतविप्रोपसर्गस्य भूतनिष्ठाविधायिनः ।
श्रीजयापीड़देवस्य पाणिनेश्च किमन्तरम् ॥"

कात्यायनकृतवार्त्तिकात् पतञ्जलिकृतमहाभाष्याच्च अन्या अपि अष्टाध्यायीसूत्रपाठस्य उल्लिखितमहाभाष्यस्य च बह्व्यष्टीकाः सन्ति बाहुल्यभिया तासां नामानि न प्रदत्तानि ॥*॥)

पाणिनीयं, त्रि, (पाणिनिना प्रोक्तं उपदिष्टं वा । पाणिनि + "वृद्धाच्छः ।" ४ । २ । ११४ । इति छः ।) पाणिनिना कृतं ग्रन्थादि । इति मुग्धबोधव्याकरणम् ॥

पाणिन्धमः, त्रि, (पाणिं धमतीति । ध्मा शब्दाग्निसंयोगयोः + "उग्रंपश्येरम्मदपाणिन्धमाश्च ।" ३ । २ । ३७ । इति खश् मुम् च ।) हस्तकर्म्मताकाग्निसंयोगकर्त्ता । एवं शब्दकर्त्ता च । इति मुग्धबोधव्याकरणम् ॥ ("पाणयो ध्मायन्तेऽस्मिन्निति पाणिन्धमोऽध्वा । अन्धकाराद्यावृत इत्यर्थः । तत्र हि सर्पाद्यपनोदनाय पाणयः शब्दायन्ते ।" इति सिद्धान्तकौमुदी ॥)

पाणिन्धयः, त्रि, (पाणिभ्यां धयति पिबतीति । धेट पाने + "नाड़ीमुष्टीस्तनकरमुष्टिपाणिनासिकात् ध्मश्च ।" इति सूत्रात् खश्प्रत्ययेन साधुः ।) पाणिद्वारा पानकर्त्ता । इति मुग्धबोधव्याकरणम् ॥

पाणिपादं, क्ली, पाणिश्च पादश्च द्वयोः समाहारः । पाणिपादयोः समाहारः । इति व्याकरणम् ॥

पाणिपीड़नं, क्ली, (पाणेः पीड़नं ग्रहणं यत्र ।) पाणिग्रहणम् । विवाहः । इत्यमरः ॥ (पाणिभ्यां पीड़नमिति विग्रहे क्रोधादिना हस्तमर्द्दनम् ॥)

पाणिभुक्, [ज्] पुं, (पाणिनेव भुज्यते दीयतेऽनेन चर्व्वादिद्रव्यं यद्वा, पाणिरिव भुज्यते यज्ञादिस्थले व्यवह्रियते इति । भुज् + क्विप् ।) उडुम्बरवृक्षः । इति शब्दचन्द्रिका ॥ (पाणिना भुङ्क्ते इति । भुज् + क्विप् ।) पाणिकरणकभोक्तरि, त्रि ॥

पाणिमर्द्दः, पुं, (पाणिं मृद्नातीति । पाणि + मृद् + "कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् ।) करमर्द्दकः । इति राजनिर्घण्टः ॥

पाणिमुक्तं, क्ली, (पाणिभ्यां मुक्तं परित्यक्तम् ।) अस्त्रम् । इति हलायुधः ॥

पाणिरुहः, पुं, (पाणौ रोहतीति । रुह + "इगुपधज्ञेति ।" ३ । १ । १३५ । इति कः ।) नखः । इति राजनिर्घण्टः ॥

पाणिवादः, त्रि, (पाणिं पाणिना वा वादयतीति । वद + णिच् + अण् ।) पाणिघः । मृदङ्गादिवादकः । इत्यमरः ॥ (पाणिना वाद्यते इति । वद + णिच् + कर्म्मणि घञ् । मृदङ्गादौ, क्ली । यथा, रामायणे । २ । ६५ । ४ ।
"अपदानान्युदाहृत्य पाणिवादाग्यवादयन् ॥")

पाणिवादकः, त्रि, (पाणिं पाणिना वा वादयतीति । वद + णिच् + ण्वुल् ।) पाणिवादः । इति हेमचन्द्रः । ३ । ५८६ ॥ (यथा, रामायणे । २ । ६५ । ४ ।
"ततस्तु स्तुवतां तेषां सूतानां पाणिवादकाः ।
अपदानान्युदाहृत्य पाणिवादाग्यवादयन् ॥")

पाणिसर्ग्या, स्त्री, (पाणिभ्यां सृज्यतेऽसौ । सृजौ ग्र विसर्गे + "पाणौ सृजेर्ण्यत् वाच्यः ।" इति ण्यत् । "चजोः कु घिण्ण्यतोः ।" ७ । ३ । ५२ । इति कुत्वम् ।) रज्जुः । इति मुग्धबोधव्याकरणम् ॥

पाणीतलं, क्ली, (पाणितलं निपातनात् दीर्घः ।) तोलकद्वयम् । यथा,—
"विड़ालपदकर्षौ च पाणीतलमुडुम्बरम् ॥"
इति शब्दमाला ॥

पाणीकरणं, क्ली, (पाणौ क्रियतेऽनेनास्मिन् वा । कृ + ल्युट् । सप्तम्याः अलुक् ।) विवाहः । इति जटाधरः ॥

पाण्डरं, क्ली, (पाण्डरो वर्णोऽस्यास्तीति । अच् ।) कुन्दपुष्पम् । गैरिकम् । इति शब्दचन्द्रिका ॥

पाण्डरः, पुं, (पाण्डरः शुक्लवर्णोऽस्यास्तीति । अच् ।) मरुवकवृक्षः । (पड़ि + अर + दीर्घश्च ।) श्वेतवर्णः । (पर्व्वतविशेषः । स तु मेरोः पश्चिमे वर्त्तते । यथा, मार्कण्डेये । ५५ । १० ।
"अञ्जनः कुक्कुटः कृष्णः पाण्डरश्चाचलोत्तमः ॥"
"पश्चिमेन तथा मेरोर्विष्कम्भात् पश्चिमाद्वहिः ।
एतेऽचलाः समाख्याताः————————॥"
ऐरावतकुलोत्पन्ननागविशेषः । यथा, महाभारते । १ । ५७ । ११—१२ ।
"पारावतः पारिजातः पाण्डरो हरिणः कृशः ।
विहङ्गः शरभो मेदः प्रमोदः संहतापनः ॥
ऐरावतकुलादेते प्रविष्टा हव्यवाहनम् ॥"
पक्षिविशेषः । यथा, ज्योतिस्तत्त्वधृतवचनम् ।
"गृध्रः कङ्कः कपोतश्च उलूकः श्येन एव च ।
चिल्लश्च चर्म्मचिल्लश्च भासः पाण्डर एव च ।
गृहे यस्य पतन्त्येते गेहं तस्य विपद्यते ॥")
तद्वर्णविशिष्टे, त्रि । इत्युणादिकोषः ॥ (यथा, हरिवंशे । ८२ । ५० ।
"असिताम्बरसंवीतं पाण्डरं पाण्डरासनम् ॥")

पाण्डरपुष्पिका, स्त्री, (पाण्डरं शुक्लवर्णं पुष्पमस्याः । कप् । ततः कापि अत इत्वम् ।) शीतलावृक्षः । इति शब्दचन्द्रिका ॥

पाण्डवः, पुं, (पाण्डोस्तदाख्यया प्रसिद्धस्य राज्ञोऽपत्यम् । पाण्डु + "ओरञ् ।" ४ । २ । ७१ । इत्यञ् ।) पाण्डुनन्दनः । पञ्चपाण्डवोत्पत्तिर्यथा,—

वैशम्पायन उवाच ।
"संवत्सरधृते गर्भे गान्धार्य्यां जनमेजय ! ।
आह्वयामास वै कुन्ती गर्भार्थं धर्म्ममच्युतम् ॥
सा बलिं त्वरिता देवी धर्म्मायोपजहार ह ।
जजाप मन्त्रं विधिवद्दत्तं दुर्व्वाससा पुरा ॥
संगम्य सा तु धर्म्मेण योगमूर्त्तिधरेण ह ।
लेभे पुत्रं वरारोहा सर्व्वप्राणिहितं वरम् ॥
ऐन्द्रे चन्द्रसमायुक्ते मुहूर्त्तेऽभिजितेऽष्टमे ।
दिवामध्यगते सूर्य्ये तिथौ पुण्येऽभिपूजिते ॥
समृद्धयशसं कुन्ती सुषाव प्रवरं सुतम् ।
जातमात्रे सुते तस्मिन् वागुवाचाशरीरिणी ॥
एष धर्म्मभृतां श्रेष्ठो भविष्यति नरोत्तमः ।
विक्रान्तः सत्यवाक् चैव राजा पृथ्व्यां भविष्यति ॥
युधिष्ठिर इति ख्यातः पाण्डोः प्रथमजः सुतः ।
भविता प्रथितो राजा त्रिषु लोकेषु विश्रुतः ।
यशसा तेजसा चैव वृत्तेन च समन्वितः ॥१॥*॥
धार्म्मिकं तं सुतं लब्ध्वा पाण्डुस्तां पुनरब्रवीत् ।
प्राहुः क्षात्रं बलं ज्येष्ठं बलज्येष्ठं सुतं वृणु ॥
ततस्तथोक्ता भर्त्रा तु वायुमेवाजुहाव सा ।
तस्माज्जज्ञे महाबाहुर्भीमो भीमपराक्रमः ॥
तमप्यतिबलं जातं वागुवाचाशरीरिणी ।
सर्व्वेषां बलिनां श्रेष्ठो जातोऽयमिति भारत ! ॥
इदमत्यद्भुतञ्चासीज्जातमात्रे वृकोदरे ।
यदङ्कात् पतितो मातुः शिलां गात्रैरचूर्णयत् ॥
कुन्ती व्याघ्रभयोद्विग्ना सहसोत्पतिता किल ।
नान्वबुध्यत तं सुप्तमुत्सङ्गे स्वे वृकोदरम् ॥
वज्रसंहननः सोऽथ कुमारो न्यपतद्गिरौ ।
पतता तेन शतधा शिला गात्रैर्विचूर्णिता ॥
तां शिलां चूर्णितां दृष्ट्वा पाण्डुर्विस्मयमागतः ।
यस्मिन्नहनि भीमस्तु जज्ञे भरतसत्तम ! ॥
दुर्य्योधनोऽपि तत्रैव प्रजज्ञे वसुधाधिप ! ॥२॥*॥
जाते वृकोदरे पाण्डुरिदं भूयोऽन्वचिन्तयत् ।
कथन्नु मे वरः पुत्त्रो लोकश्रेष्ठो भवेदिति ॥
दैवे पुरुषकारे च लोकोऽयं संप्रतिष्ठितः ।
तत्र दैवन्तु विधिना कालयुक्तेन लभ्यते ॥
इन्द्रो हि राजा देवानां प्रधान इति नः श्रुतम् ।
अप्रमेयबलोत्साहो वीर्य्यवानमितद्युतिः ॥
तं तोषयित्वा तपसा पुत्त्रं लप्स्ये महाबलम् ।
यं दास्यति स मे पुत्त्रं स गरीयान् भविष्यति ॥